M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 212

Title: Pashu Bandha Prayoga

212

	Pashu Bandhas Prayoga		Title
		Shesha.	Author
			Editor
			Year, Vols.
			Publisher
212		Baudhāyana Sootranusā-ri.	Remarks

212

शेषकृतपद्धबंधःप्रारंभः पत्र ३१

बौधायनसूत्रानुसारी ॥

॥श्रीगणेशंबागुरुभ्योनमः॥ ॥अथपशुबंधप्रयोगः॥ ॥तस्यउदगयनेपूर्वपक्षे
देवनक्षत्रेरेवत्यांवा अमावास्यांवायजनीयेरनुष्ठानं॥तस्यप्रयोगेपूर्वेद्युर्नांदीश्रा
द्धंपात्रासादकरणांतिंकृतिसरबंधंकुर्यात्श्वःस्नानादिपंचकंकुर्यात्॥पुण्याहेपशुदे
वतामुद्दुत्याप्रीयतामितिवदेत्॥गार्हपत्यस्यपश्चात्सपत्नीकोदर्भांधारयमाणो
दर्भेषूपविश्यपाःपुरस्तादित्यादिस्वर्गकाम ऐंद्राग्नेननिरूढपशुबंधेनयक्ष्यइति
त्रिरुपांशुत्रिरुच्चैरुक्त्वाप्रतिप्रस्थात्रप्रशास्त्रसहितान्आकृतान्दत्त्विजोवृत्वापत्नु
नायक्ष्यमाणोन्वारंभणीयपायक्ष्यइतिसंकल्पतयाब्राह्मणतर्पणांतादग्नीनरण्योः
समारोप्योदवसायमथित्वाध्युरग्नीन्विहृत्यस्मार्तेवदाज्यंसंस्कृत्यस्रुचिचतुर्गृहीतं १

गृहीत्वामनस्वतींहुत्वाउद्धरणपक्षेपुनर्विहृत्यचतुर्गृहीतेनषड्ढोतारंमनसानुद्रुत्या
हवनीयेजुहोत्यन्वारब्धेयजमाने॥स्रुयैतेचक्षुः।वातंप्राणः।द्यांपृष्ठं।अंतरिक्षमा
त्मा।अंगैर्यज्ञं।पृथिवींशरीरैः।वाचस्पतेऽछिद्रयावाचा।अछिद्रयाजुह्वा।दिविदे
वावृधंहोत्रामेरयस्वस्वाहा।वाचस्पतेब्रह्मणे॰।पुनर्विहृत्यकुष्मांडहोमउपस्थानवर
दानांतः।पुनर्विहृत्यसारस्वताहुती।पुनर्विहृत्यचतुर्गृहीतेनयूपाकृतिंजुहोति।उरुवि
ष्णोविक्रमस्वोरुक्षयायनःकृधि।घृतंघृतयोनेपिबप्रप्रयज्ञपतिंतिरस्वाहा।विष्णवे
इदं॰।अपरंचतुर्गृहीतंगृहीत्वान्यस्याल्लीसस्रुवांबर्हिर्हिरण्यमुदपात्रमित्यादाय
सप्ररचुंतक्षाणमाहूयएहियजमानेत्युक्त्वापूर्वयाद्वारोपनिःक्रम्यप्रदेशांगत्वाप्रत्य

प॰प्र॰
२

कृत्वा यूपं प्राङ्मुख उपतिष्ठते। अत्यन्यानगां नान्यानुपागामर्वाक्त्वा परैरविदं परोऽवरैस्तं
त्वा जुषे वैष्णवं देवयज्यायै इति। आज्यशेषं स्रुवेणोपहृत्य यूपस्य मूलमनक्ति।
देवस्त्वा सविता मध्वानक्त्विति। यूपमूलमध्ये बर्हिरनुप्रस्यति। ओषधे त्रायस्वैनं।
तदुपरि स्वधितिना तिर्यक् छिनत्ति। स्वधिते मैनं हिंसीरिति। यः प्रथमः श-
कलः परापतति तं यूपावटे प्रक्षेपार्थं ब्रह्मा तं निदधाति। यूपं पश्चित्तापतत्परस्य प्राचीं
चोदीचीं वा पतन्तमनुमंत्रयते। दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिंसीः पृथिव्या
संभव। आव्रश्चने हिरण्यं निधाय परिस्तीर्य परिषिच्य पूर्वाहुतेन चतुर्गृहीतेन जुहो-
ति। वनस्पते शतवल्शो विरोह इत्याहुति वनस्पतये इदं०। आत्मनो हृदयमभिमृशति। २

सहस्रवल्शा वि वयं रुहेम। अपउ० मूलादारभ्याग्रादन्त्यग्रं गारवाश्छेदयति। यं त्वा-
यं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायेति सकृदेव मंत्रः। हस्तपरिधिं गा-
दनधिकं प्रादेशपरिमाणाद्न्यूनं उपरेतासरूपं चारत्निं चषालस्थापनार्थं चतुरंगुला- पा
धिकमग्रतश्छिनत्ति। अच्छिन्नो रायः सुवीरः। छिन्नशेषस्य मूले चतुरंगुलमात्रं च-
षालं छित्वा सशुषिरं कृत्वा यूपाग्रे चतुरंगुलं संतक्ष्य तस्मिन्प्रवेशयति। मूलप्रदेशे
रत्निमात्रमुपरं त्यक्त्वावशिष्टाश्रिं चतुरश्रिं वा तक्षयेत्। स्वर्वयेमेकमपि मंथनार्थं च-
त्वारि शकलानि स्थापयेत्। ततो यूपमाहृत्य पाशुकवेदिमानं कुर्यात्। आहवनी-
यस्य पुरस्तात्पदद्वये शंकुं निहन्यात्॥ ततः पुरस्तात्प्रादेशापदे शंकुः अष्टादश प-

दक्षमाणां रज्जुमुभयतः पाशां कृत्वा त्रयोदशपदे चतुर्दशपदे चान्यं चिह्नं कृत्वा त्रयो
दशपदक्रमाणायतचतुरस्रा भवति तथा शंकोः पाशौ प्रतिमुच्य त्रयोदशपदन्यंचि
नेन दक्षिणत आकृष्य त्रयोदशपदे शंकुं निहन्यात्। एवमुत्तरतोप्याकृष्य शंकुं
निहन्यात्ते श्रोणी। रज्जुं विपर्यस्य दक्षिणतः पूर्ववदाकृष्य चतुर्दशपदे शंकुं निह
न्यात्। एवमुत्तरतोप्याकृष्य तावंसौ॥ एवापास्तुकी वेदिः। द्वादशपदे शंकोः प
त्यग्यूपावटार्थपदार्थमवशेष्यानुपृष्ठ्यं शंकुं निहन्यात्। ततः पश्चादनुपृष्ठ्यं श
म्यामात्रे शंकुं निहन्यात्। तत्राहवनीयवत्छम्यामात्रीं छायां चतुरस्रामुत्तरवेदिं
कुर्यात्। तस्यां मध्ये चतुरंगुलोछ्रायामभितः प्रादेशमात्रीं समचतुरस्रामुत्तरना ३

भिं कुर्यात्। अपिवा प्रादेशोर्ध्वप्रमाणादुत्तरवेदिः गोष्पदमात्री नाभिः। वेद्युत्तरांसश
कुमारभ्य प्रत्यक् पदद्वयं पदत्रयं वा मीत्वा तदुत्तरतो तावदेव मीत्वा तत्र शम्यामात्रश्चा
त्वालः। तथैव पदचतुष्टयं मीत्वा उदगेकं पदं मीत्वा शंकुं निहन्यात्स उत्करः। एवं वेदिं वि
धाय तामग्निवत्परिस्तरणाति। यजमानः भोजनं पवनं नवनीताभ्यंजनं महणोरंजनं
चकरोति। अत्र देवतासंकल्प इति केचित्। अध्वर्युरिडादेवहूरिग्नीन्निहत्यान्वा
धायवत्सऋणांते चास्वारुरणपश्चेतामाछिन्नचि। हूबेत्वोर्जेत्वेति। तक्ष्णी प्रस्त्रा
रवां माछिधोमे शारवेत्तक्ष्णीमाहत्यन्तक्ष्णी यजमानमवेक्ष्यरति। यजमानस्य पु
स्त्र्याहीतिवसापाकरणार्थयोपाध्यारवांनेति केचित्। बर्हिः संभरणादि आश्व

प० प्र०
५

बर्हिः प्रस्तरः ऐक्षवी विधृती केचित्कुशमिमंत्रे प्रस्तरः । पंचविधं बर्हिः कार्ष्मर्यमयाः
परिधयः । सन्नद्धास्सामिधेन्यः । ततस्त्वां च यौ वि [illegible] शातिं स्रुचः । शाखापवित्र
करणपक्षे पशुं [illegible] हव्यं करोतु मे इति विशेषः सायमग्निहोत्रहोमानंतरं उत्तरेणगा
र्हपत्यं [illegible] स्रवणानि सद्धस्तार्थं तेषु सादयति । पशुकुंभी शाखापवित्रं च त्रि
गुणां चियाया मंथनुरज्जानां कार्ष्मर्यमयौ वपाश्रपण्यौ विशाखमविशाखां च कार्ष्म
र्यमयं हृदयशूलं यजमानमुखसंमितं मैत्रावरुणदंडं चेति । ततउत्तानी कृत्य क
मंडलाभिरद्भिरेतत्सर्वं प्रोक्षति शुंधध्वमिति । शातर्कुलेग्निहोत्रे बर्हिर्लवनादि ब्रा
ह्मणतर्पणांतामाग्नेयीमिष्टिं कुर्यात् । तस्या अन्वाधानव्रतेन रतः । सद्यस्काल ५

पक्षेपि नांदीमुखादि पूर्वेद्युः वेदिमानमपि पूर्वेद्युरेव । अपरेद्युः स्नानादि पंचकं पशु
संकल्पानंतरमन्वारंभणीयां कुर्यात् । अग्नी नरण्योः समारोप्य प्रत्यक्षं वानयेत् । मं
थनपक्षेग्नीन्विहृत्य मनस्वतीं हुत्वा पुनर्विहृत्य पष्टौत्तकूष्मांडसारस्वतहोमांतं समा
नं । अनंतरमग्निदैवत्यां पश्विष्टिमन्वाधानादि ब्राह्मणतर्पणांतं कुर्यात् ततो
यूपाहुत्यादि पात्रकृवेदिकरणपरिस्तरणांतं कुर्यात् । यजमानो देवतासंकल्पं क
रोति । आग्नीषोमावाज्यभागौ इंद्राग्नी पशुदेवता वनस्पतिः पृषदाज्यदेवता । देवा
आज्यपाः अग्निः स्विष्टकृत् एकादश प्रयाजा एकादशानुयाजा एकादशो प
याजा अष्टौ पत्नीसंयाजा इत्यादि । सद्योयूपइति । अन्वाधानं कुंभ्यंदीनां प्रोक्षणां

तंसमार्ष्टि। ततः पाणिसंमर्शनादि अग्नीन् परिस्तीर्याहवनीयस्य पुरस्ताद्दर्भान् स
स्तीर्य तेषु पात्राणि सादयति। स्फ्यमग्निहोत्रहवनीं स्रुक्स्रुवसाहोमहवनीं कृष्ण
तं पृषदाज्यग्रहणीं स्रुवं स्वधितिं ध्रुवां प्राशित्रहरणं इडां वेदं आज्यस्थाली
दधीस्थाली योक्त्रं वेदाग्रं धृष्टिमुपवेषमिध्मप्रव्रश्चनमन्वाहार्यस्थालीमिति।
व स्थाणं दक्षिणतस्तूष्णीमुपवेश्य दृष्ट्वा स्तीर्ता पवित्रं कृत्वा यजमानवाचं
यच्छेत्युक्त्वा वेषाय त्वेत्यग्निहोत्रहवणीमादाय प्रत्युष्टमिति गार्हपत्ये निष्ट
प्य संस्कृत्य प्रोक्षिताः स्थेत्यनं कृत्वा शुंधध्वमित्युत्तानानि पात्राणि कृत्वा प्रो
क्ष्याज्यं दधि निरूप्याधिश्रित्य पर्यग्निकरोति। पश्चिमशिरां क्षौ स्मार्तवत्संस्कृ ५

ताज्येनाज्यैव पूर्णाहुतीः कार्याः। ततोयं वेद इत्यादि पाशुकी वेदिं विः समार्ष्टि वेदेन
वेदिमिति जघनेन वेद्यैति छिन्नस्फ्यदानाद्यग्नीदितरो रेत्येतं प्रकृतिवत्। अथस्फ
यमुदपात्रं बर्हिः शम्यामित्येतत्समादाय एहि यजमानेत्युक्त्वा चात्वालदेशं यजमा
नपत्नीभ्यां सह गत्वा स्फ्येनोद्धत्याचोद्य चात्वालपूर्वभागे उदीचीनकुंबां शम्यां नि
धायांतरतः स्फ्येनालिखत्युद्गपवर्गं वितायं नीमेसि। दक्षिणतः प्राचीनकुंबां
तरतः स्फ्येनालिखति प्रागपवर्गं। तितायनीमेसि। पश्चादुदीचीनकुंबां निधा
येवं। अवतान्मानाथितं। उत्तरतः प्राचीनकुंबां निधायैवं। अवतान्मार्व्यथितं। ६
चात्वाले उदगग्रं बर्हिर्निधाय यजमानपत्नीभ्यामन्वारब्धस्तस्यमूलेस्फ्येन प्र

हरति। विदेरग्निर्नभो नामाग्ने अंगिरो योऽस्यां पृथिव्यामसि। मृदमादत्ते। आयुषा
नाम्नेहि। हृत्वोत्तरवेद्यां निवपति। यत्तेनाधृष्टं नाम यज्ञियं तेन त्वादधइति। एवं द्विती
यमेवं तृतीयं। यो द्वितीयस्यां पृथिव्यामसि यस्तृतीयस्यां पृथिव्यामसि इति विशेषः।
तूष्णीं चतुर्थं सह बर्हिषा। अथ चात्वालस्य येन मुद्धृत्या हाग्नीदितस्त्रिर्हरति। आ
ग्नीध्रश्चात्वालात्पुरीषमादायोत्तरवेद्यां निवपति। अध्वर्युर्युक्तं पुरीषं संवपति। सिं
हीरसि महिषीरसि। प्रथयति। उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति। स्फ्येन
संहंति। ध्रुवासीति। अद्भिरवोक्षति। देवेभ्यः शुंधस्व। उत्तरवेदिं शम्यया मीत्वा म
ध्ये पादेनामात्रीं समचतुरस्रां चतुरंगुलोच्छ्रायामुत्तरनाभिं कृत्वा दर्भैः प्रच्छादयति।। ६

देवेभ्यः शुंधस्व। सिकताभिरनुप्रकिरति। २

देवस्थलेत्यग्निमादाय। सिंहीरसि नारिरसित्यभिमंत्र्य तत्प्रादेशमंतरवेद्यर्थं वहिर्वे
दि पदमात्रविष्कंभं यूपावटं परिलिखति। परिलिखितं रक्षः परिलिखिता अरातय
इदमहं रक्षसो ग्रीवा अपिकृंतामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृं
तामि। अथाग्नीध्र आह। अग्नीदेहीमं यूपावटं खनोपरसमितं प्राक्पुरीषमुदप
तात्चतुरंगुलेनोपरमतिखनताम्। स तथा करोति कारयति वा। अध्वर्युरुत्तरवेदि
कं करोति तदा प्रतिप्रस्थाता त्रिः प्रादेशप्रमाणैरनियतसंख्यैः काष्ठैरिध्मं बध्नाति
प्रणयनार्थमाहवनीयं प्रक्षिप्य ज्वलयति। आग्नीध्रश्चात्वालान्मृदा पूरितां पात्रीं प्र
ण्युद्धरणपात्रे उपयमनार्थमग्निसमीपे स्थापयति। अध्वर्युस्तूष्णीमुत्पूताः प्रोक्षणीः

प॰ सू॰
७

प्रस्थाने प्रयच्छति। परिकर्मिहस्ते स्मात्त्वसंस्कृतं पंचगृहीतमाज्यं ब्रह्मणो हस्ते पौतु
द्रवान् परिधीन् गुग्गुलु सुगंधितृणं मेषशृंगं मध्ये उत्तरपूर्वदेशात् गृहीतानि शुक्लानि
रोमाणि। अथ संप्रैषमाह। अग्नये प्रणीयमानायानुब्रूहि अग्नीदेकस्फ्यया अनुसंधे
हि। होता अयमु ष्येत्यारब्धो उपयमनीमग्न्युद्धरणपात्र्या अधस्तादुपयम्य यजमा
नपत्नीभ्यामन्वारब्ध इध्ममादायोत्तरवेदिमनतिक्रामन्होतुर्दक्षिणांगतो उत्तरवेदेः प
श्चात्पदमात्रेवतिष्ठेत। आग्नीध्रः पश्चात्स्फ्येनोल्लिखितलेखयाऽहोतुः पदं प्रच्छाद
यन्नेति सर्वे वेदिमनतिक्रामंत उत्तरेणाग्नीध्रं गच्छेयुः। अध्वर्युरन्यहस्तेऽग्निं दत्वा प्र
तिप्रस्थातृहस्तादिंद्रघोषवतीः प्रोक्षणीगृहीत्वोत्तरवेदिं प्रथमं पुरस्तादारभ्य म ७

ध्ये समापयन्प्रोक्षति। इंद्रघोषस्त्वा वसुभिः पुरस्तात्पातु। एवं दक्षिणतो मनोजवास्त्वा
पितृभिर्दक्षिणतः पातु। एवं पश्चात्प्रचेतास्त्वा रुद्रैः पश्चात्पात्विति। एवमुत्तरतो विश्व
कर्मा त्वादित्यैरुत्तरतः पात्विति। प्रोक्षणीशेषमुत्तरवेद्या दक्षिणांसस्य दक्षिणतो नि
नीय पांसुबंधिकाया वेदेर्दक्षिणांसस्य दक्षिणतो वा परिकर्मिहस्तात्पंचगृहीतमा
ज्यमादाय हिरण्यं स्रुङ्मुखे लंबयित्वा उत्तरवेद्या दक्षिणांसादारभ्य मध्ये समापय
न्नाघारयति। सिंहीरसि सुप्रजावनिः स्वाहेति। दक्षिणां श्रोणिमारभ्य तथैव सिं
हीरसि रायस्पोषवनिः स्वाहेति। उत्तरां सादारभ्य तथैव सिंहीरस्यादित्यवनिः
स्वाहेति। मध्ये व्याघारयति। सिंहीरस्यावह देवान्देवयते यजमानाय स्वाहेति॥

+ सिंहीरसि सपत्नसाही स्वाहा॥ उत्तरां श्रोणिमारभ्य तथैव॥ २

प०भू०
८

सर्वतोत्तरवेद्याः इदमिति यजमानः। स्रुवमुद्गृह्णाति। भूतेभ्यस्त्वेति। ब्रह्मणोदस्ताद्वै
दारवान्परिधीनादाय मध्यममुत्तरनाभेः पश्चात्परिदधाति। विश्वायुरसि पृथिवीं
दृंह इति। ध्रुवक्षिदस्यन्तरिक्षं दृंह इति। दक्षिणं अच्युतक्षिदसि दिवं दृंह इत्युत्तरं। गुग्गु
लु सुगंधितेजनं श्वेतोर्णास्तुकां चोत्तरनाभ्यां निवपति। अग्नेर्भस्मास्यग्नेः पुरी
षमसि। निहितानां संभारणां माघारत्रोषेण त्वक्षीमाघारणं कृत्वा च दक्षिणमा
हृत्याग्निं गृहीत्वोत्तरवेदेः पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्संभारेष्वग्निं प्रतिष्ठापयति। त्य
ङ्प्रतितिष्ठ स्वमुत्तरोत्तरो वा आत्वा वसवो नि पुरुधा विशन्तु। दीर्घमायुर्यजमानाय कृ ८
एवन्नथा मत्तेन जरितार मांघि॥ इध्मां विस्रस्य परिसमुह्य पर्युक्ष्य परिस्तीर्यां कुर्ति

प्रजानन्नेनैनं यज्ञहनो विदन्नु। देवेभ्यः प्रब्रूतायज्ञं प्रप्रयज्ञपतिं तिरु२

षादं कृत्वा कांश्चित्समिधमादाय स्मार्तेव संस्कृताज्येन यजमानान्वारब्धः स कृ
त्स्मादं जुहोति। अग्निर्यज्ञं नय तु [redacted] (३३३) स्वाहा। अग्नये य
ज्ञपतय इदं०। वायुर्यज्ञं नय त्वं प्रजानन्नेनैनं यज्ञ हरु नो० वायवे य० सूर्यो यज्ञं नय० सू
र्याय यज्ञ० यज्ञो यज्ञं नयतु० यज्ञाय यज्ञपतय इदं०। तेनैवाज्येन तथैव यजमानो जु
होति। अग्निरन्नादोन्नपतिरन्नस्येशः सोऽस्मै प्राणं ददातु स्वाहा। वायवे प्राणद इदं०।
आदित्यो भूरिभृद्भूयिष्ठानां पशूनामीशः सोऽस्मै भूयिष्ठान्पशून्ददातु स्वाहा। आदि
त्याय भूरिद इदं०। ब्रह्मा वेदे दक्षिणत उत्तरवेद्याः जंवेन मेत्रेणो पविशति तस्य पश्चा

सोऽस्मै अन्नं ददातु स्वाहा॥ अग्नयेन्नादायेदं०। वायुः प्राणदः प्राण स्ये२

प॰भ॰
६

यजमानः। अध्वर्युरुत्तरं परिग्राहं परिगृह्य योयुपित्वा स्फ्यं तिर्यंचं स्तब्ध्वासंभेदमा
द्रा। प्रोक्षणीरासादयेध्मा बर्हिरुपसादयस्रुवं स्वधितिं स्रुचश्च संमृड्ढि पत्नींप
पदाज्यग्रहणीं पत्नीं संनह्याज्येनचंदध्याचोदेद्रिः। प्रोक्षण्यासादनादि प्रकृतिवत्।
संमार्जने शालामुखीये प्रतितप्य स्रुवं वत्स्वधितेर्जुहूं च प्रसादोमहवन्या उपभृता सह
पृषदाज्यग्रहण्याः संमार्गः समानमाज्यग्रहणात्। उपभृति चतुर्गृहीतं गृहीत्वा पृ
षदाज्यग्रहण्यामुपस्तरणीते। मृद्वीबांपयोसीत्येकं। विश्वेषां देवानां तनूरिति द्विती
यं। बर्हिषी अंतर्धाय दध्यानयति। ऋध्यासं मद्य पृषतीनां ग्रहं पृषतीनां ग्रहोसि।
अपो धृत्वा बर्हिषी अभिघारयति। विस्रोर्हृदयमसीत्येकं। एकमिषुविष्णुस्त्वानुवि ७

यंक्रमे। यजमानश्च रोस्त्वेत्यादि चतुर्भिरुपभृदाज्यग्रहण्यनुमंत्रयते। ततैश्चतुर्भिः पृ
षदाज्यग्रहण्युपस्तरणाभिघारणान्यनुमंत्रयते। अध्वर्युः पंचविधं बर्हिः स्तीर्त्वा
कार्षियमयान्परिधीन्परिदधाये विधृत्योरम्बवालं प्रस्तरं निधायोपभृतानंतरं दे
मंत्रेण पृषदाज्यग्रहणीमासाद्य ध्रुवामासादयेद्यजमानमन्यते। आज्यस्थाल्याः
पुरितं स्रुवं स्वधितिं च अग्रेण स्रुचो नीत्वा दक्षिणेन जुहूं प्रस्तरे सादयति। स्योनौ
मेसीदत सुषदौ पृथिव्यां प्रथयिष्णु जर्या पशुभिः सुवर्गे लोके दिवि सीदतं पृथिव्या
मंतरिक्षे ह भुवंरो भूयासम धर्रेम सपत्नाः। एतौ यथाहृतं प्रतिपर्याहृत्य ध्रुवायाम
वदधाति। ऋषभोसि शाकुरो घृताचीनां सूनुः प्रियेण नाम्ना प्रियेसदसि सीदतं।

प०प्र०
१०

आसन्नाभिमंत्रणंप्रकृतिवत्। अथप्रदक्षिणमावृत्य प्रत्यङ्ङुदङ्ङुत्य तत्स्त्रीसंस्कृताः
यवमतीः प्रोक्षणीर्बर्हिर्मुष्टिं सस्रुवं स्मार्त्तमाज्यस्थालीं स्वरुं स्थाने मैत्रावरुणं दंडं प्रथ
मपतितं यूपशकलं हिरण्यमुदपात्रं चादायोत्तरवेदिसमीपे निधायोदपात्रोदकेन यू
पं प्रक्षालयति। यत्त्वैस्त्रिकः पुरावेधात्स्पृहस्तैनवाश्रया। आपस्तेतद्वनस्पतेरपनुदं
तु शुंधनीरिति। अंतरेण चात्वालोत्करौ यूपं प्रपाद्य यूपावटस्य पुरस्ताद्यूपं प्रागग्रं
शाययित्वोत्तरवेद्यां उत्तरतस्तिष्ठन् मूलादारभ्याग्राद्यवमतीभिः प्रोक्षणीभिः सकृ
द्देवेभ्यो इति। पृथिव्यै त्वांतरिक्षाय त्वा दिवे त्वेति। यूपावटे प्रोक्षणीर्नयति। शुंधतां लोकः
पितृषदन इति। अवटे यवान् प्रक्षिपति। यवोसि यवयास्मद्द्वेषो यवया[illegible]रातीरिति। प्रा १०

चीना। वीतिर्बर्हिर्मुष्टिं द्वेधा विभज्यार्धं प्रागग्रमर्धं दक्षिणाग्रं कृत्वा तयोर्मध्यमवटस्य
मध्ये निदधाति। पितृणां सदनमसीति। अवटे हिरण्यं निधाय तस्योपरि स्रुवाहुतिं
जुहोति। पितृभ्यः स्वाहेति। यजमानः प्राचीनावीती पितृभ्य इदं०। अध्वर्युर्यज्ञोपवी
ती प्रथमपतितं यूपशकलमवटे प्रक्षिपति। स्वावेशोस्यग्रेगा नेतॄणां वनस्पतिरधि
त्वा स्थास्यति तस्य वित्तादिति। ता माज्यस्थालीं सस्रुवां स्वरुं यूपरशनां मैत्रावरुण
दंडमुदपात्रं चादायैहि यजमानेत्युक्त्वाग्रेण यूपं परीत्य दक्षिणत उदङ्मुखस्तिष्ठति। य
जमानो यूपस्यावटस्य च मध्येन गत्वोत्तरतोग्रेण यूपं परीत्याध्वर्योर्यूपस्य च मध्ये
न पश्चादुदङ्मुखस्तिष्ठति। पत्नी चाध्वर्योरुत्तरतो गत्वा यजमानस्य दक्षिणतः

प०भ०
११

पश्चात्कृत्वोदग्गुरत्नीरिक्षिप्यति। उपरसमीपे अध्वर्युश्चषालमुन्मुच्याज्येन यूपाग्रं स्रुवेणा
नक्ति। देवस्त्वा सविता मध्वानक्त्विति। चषालमंतरतश्च बाह्यतश्च स्वभ्यक्तं कृत्वा यूपाग्रे
प्रतिमुंचति। सुपिप्पलाभ्यस्त्वौषधीभ्य इति। तस्तलकाविद्धितामग्निष्ठामश्रिं स्रुवेणा
भिघारयन्नाह। यूपायाज्यमानायानुब्रूहि। अंजनप्रभृतिस्वर्वग्रहणांतं पत्नीय जमा
नो यूपं नोत्सृजेनां। अध्वर्युर्यूपस्योपर्याज्यमाने यति। यजमानस्तेनाज्येन यूपमुपर
वर्जं सर्वतः समनक्ति। पत्न्युपरमनक्ति। अध्वर्युरवटाद्दर्भानुपमुच्छ्यन्नाह। यूपायोच्छ्री
यमाणायानुब्रूहि। यजमानेन सह यूपमुच्छ्रयति। उद्दिवꣳ स्तभानांतरिक्षं पृण दृꣳहस्व पृथिवीमु प
परेण दृꣳह। यूपमवटे प्रवेशयति। ते ते धामान्युश्मसी गमध्ये गावो यत्र भूरिशृंगा अया ११

सः। अत्राह तदुरुगायस्य विष्णोः परमं पदमव भाति भूरेः। विष्णोः कर्माणि पश्यत यतो व्रता
नि पस्पशे। इंद्रस्य युज्यः सखा। यदाग्निष्ठामश्रिमाहवनीयाभिमुखीं करोति तदा स्थिर
स्य यूपस्य चषालं यजमानमवेक्षयति। तद्विष्णोः परमं पदꣳ सदा पश्यंति सूरयः। दिवीव च
क्षुराततं। अवटे प्रदक्षिणं मृदं प्रवेशयति। ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोष
वनिं पर्यूहामि। मैत्रावरुणो दंडेन समभितः सꣳहति। ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह राय ह
स्पोषं दृꣳहेति। अवटं पांसुभिः मेरन्यूनानतिरिक्तं धुरीयेण प्रच्छाद्य तत्रोदपात्रं प्रदक्षिणं
निनीय यूपरशनामादाय त्रिः संभुज्य मध्यमेन गुणेन यूपं दक्षिणैस्त्रिः प्रदक्षिणं परिव्यय
न्नाह। यूपाय परिवीयमाणायानुब्रूहि। परिवीरसि परि त्वा दैवीर्विशो व्ययंतां परीꣳग

ऽराय स्पोषो यजमानं मनुष्याः । यूपसमीपमारभ्य परमं लग्नं कृत्वा अंते प्रवेश्य कु
शलक्रियया ग्रंथिं कृत्वा रशनाग्रं ग्रंथि भिद्य मूलं प्रवेश्याग्निष्ठाभ्यां मध्यमां रशनागु
णं निर्भिद्य तत्र स्वरुं प्रवेशयति ॥ अंतरिक्षस्य त्वा सानावगूहामि । सर्वे यूपमुत्सृ
जंति । अथैनं पशुं हरिद्रामलकादिभिः स्नापितं मंत्रेण घात्वा लोकेरी वपाद्य यूपा
हवनीययोर्मध्येन दक्षिणतो नीत्वा यूपस्य पुरस्तात् प्रत्यङ्मुखं यः कश्चिद्धारयति । २५
पशोरुक्तवर्णाभावे प्रतिषिद्ध एकखुरश्चेति प्रतिषिद्धत्वेन धर्तुं नित्यान्यरूपास्या
न्येन वसा होमहवन्या प्रायश्चित्तानि जुहोति । अग्निर्मूर्धा० अपां रेतांसि जिन्व
ति स्वाहा । अग्नय इदं० अग्नाविष्णू० गतं स्वाहा । अग्नाविष्णुभ्यामिदं० । इंद्रं वि १२

श्वा अवीवृधन्० रथीतमं रथीनां वाजानां सत्पतिं पतिं स्वाहा । इंद्रायेदं० ।
वायोः शतं हरीणां० नसा स्वाहा । वायव इदं० । प्रजापते न० रयीणां स्वाहा । प्रजा
पतय० । प्रतिवर्हिर्मंत्रं वदन्निधेत्वेति बर्हिषी आदाय पशोः शृंगयोर्मध्यं बर्हिर्भ्या
मन्वारभ्येंद्राग्निभ्यां त्वा जुष्टमुपाकरोमीति यजमानेन सह संकल्पोपाकरोति । उ
पवीरस्युपो देवान् दैवीर्विशः प्रागुर्वह्नीरुशिजो बृहस्पते धारया वसूनि हव्या
ते स्वदं तां देव त्वष्टर्वसु रण्व रेवती रमध्वं । प्रजापते र्जायमानाः प्रजा जाताश्च या
इमाः । तस्मै प्रतिप्रवेदय चिकित्वां अनुमन्यतां । इमं पशुं पशुपते ते अद्य बध्ना
म्यग्ने सुकृतस्य मध्ये । अनुमन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यं

द्राग्निभ्यां त्वा जुष्टमुपाकरोमि । बर्हिषी अन्योरसंस्पृष्टे प्रज्ञाते निधायोत्तरवेदि समी
पे पूर्ववत्परिगृहीतमाकलत्रयेण मथिमंथनं प्रागायतं निदधाति । अग्नेर्जनित्रमसि ।
तस्य पार्श्वयोः प्रागायतौ दर्भाभ्यां युगपद्वृषणौ वल्कौ निदधाति । वृषणौ स्थः । दक्षि
णेनोत्तरारणिं सव्येनाधरारणिमादत्ते । उर्वश्यस्यायुरसि पुरूरवाः । ते अध्वर्युराज्यस्था
ल्यां समनक्ति । घृतेनाक्तौ वृषणं दधाथां । अथाग्निमंथनशकले अरणी निधाय य धि
जमानं वाचयति । गायत्रं छंदोनु प्रजायस्व । त्रैष्टुभं छंदोनु प्रजायस्व । जागतं छंदोनु
प्रजायस्व । मथ्नन्नाह । अग्नये मथ्यमानायानुब्रूहि । जात आह । जातायानुब्रूहि । प्र
ह्रन्नाह । प्रह्रियमाणायानुब्रूहि । प्रहरति । यजमानेन्वारब्धः । भवतन्नः समनसौ स १३

मोकसावरेपसौ । मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः । अग्न
वाज्येन सकृद्गृहीतेन जुहोति । अग्नावग्निश्चरति प्रविष्टः ऋषीणां पुत्रो अधिराज एषः ।
स्वाहाकृत्य ब्रह्मणा ते जुहोमि मा देवानां मिथुया कर्म भागधेयं स्वाहा । प्रविश्याग्नय इदं ।
देवस्य त्वेति । मा ददे इति द्विगुणां रशनामादाय तया सव्यशृंगं वर्जं पशुमक्ष्णया शि
रसि बध्नाति । ऋतस्य त्वा देवहविः पाशेनारभे । द्विगुणां त्रिगुणां एकीकृत्य बध्नाति ।
धर्षा मानुषानिति । पशुर्यदि पदाभ्यां धृस्तिष्ठेत्तर्हि ऊर्ध्वं गुणं ऊर्ध्वो निःपादि इत्यनुमं
त्र सर्वप्रायश्चित्तं जुहुयात् । तस्मै संस्कृताभिरद्भिः पशुं प्रोक्षति । अद्भ्यः स्त्वौष
धीभ्यः इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामीति । पात्रांतरे यजमानीय पशुं पदीन पिबेन्त्वा

प॰प्र॰
१४

उदेतदित्येनपाययति। अपांपेरुरसि। इत्यनी संस्कृताभिरद्भिः पशुमुपरिष्टोत्स्याधस्ता प
दुपोक्षति। स्वात्तंचित्सदेवᳪहव्यमापोदेवीः स्वदतैनं। प्रोक्षणीं निधाय। अथेध्मास
मिधमादाय आह अग्नयेसमिध्यमानायानुब्रूहि इत्यादिस्रुचमाघारमाघार्य इद
द्धः त्याक्रम्याजौहवेन आज्येन ललाटे पशुं समनक्ति। संतेप्राणोवायुनागच्छतामितिक
कुदि। संयजत्रैरंगानीति। दक्षिणस्यांश्रोण्यां संयज्ञपतिराशिषेति। ततोध्रुवामस्व
स्यसमज्यप्रथायतनᳪस्रुचौसादयित्वाप्रवरंवृणीते। होतुः प्रवरानंतरंपुनराश्राव्य
प्रत्याश्राविते मित्रावरुणो प्रशास्तारो प्रशास्तादित्युक्त्वा मैत्रावरुणस्य नाम गृह्णा
ति। पुनराश्राव्य प्रत्याश्राविते आह अग्निर्देवीनांविशांपुरएतायंयजमानोम १४

नुष्याणांतयोरस्थूरिगार्हपत्यंदीदयच्छतᳪहिमाद्वायूराधाᳪसीसंपृञ्चानावसंपृञ्चानौ
तन्वः। समानप्रयाजेभ्यः घृतवतीशब्देजुहूपभृतावादायात्याक्रम्याश्राव्यप्रत्याश्रा
विते आह तत्र विशेषः समिद्धः प्रेष्यप्रेष्यप्रेष्यतीतरान्द्वितीयादिषुप्रशास्त्रास
ह्यजेतिवदेत्तवा। चतुर्थाष्टमयोः समानोष्टमेसर्वंसमानयतेस्वाहाकृतीभ्यः संस्रा
वंपरिशिनष्टिपंचमादीनांपंचमस्यैवयाजमानंदशप्रयाजनिष्टोदङ् त्याक्रम्यस्व
रुं विशासनस्वधितिंचादाय तौसहजुहूं समज्यताभ्यांसदैवपशुᳪसमनक्ति। घृतेना
क्तौपशुंत्रायेथामिति। स्वधितिं शमितुर्हस्तेप्रयच्छति। स्वरुं शासनायामवगूहतियथा
यतनᳪस्रुचौसादयित्वादपर्यग्नयेक्रियमाणायानुब्रूहि। आग्नीध्र आहवनीयादुल्मु

कमादायांतरेणचात्वालोत्करावुत्तरेणशामित्रमग्रेणपशुंजघनेनस्रुचइत्येवंत्रिःप्रद
क्षिणंपर्येतियथोल्मुकमंतर्भवतिस्रुचयंबहिर्भवति।अध्वर्युरपूर्वांग्यासकृत्गृहीते
नपरिसरणत्रयेप्रथमे कंउत्तरयोर्द्वयोरेवंपंचापाव्यानिजुहोति।प्रज्ञानंतःप्रतिगृ
ह्णंतिपूर्वेप्राणमंगेभ्यःपर्यावर्तंत।सुवर्गंयाहिपथिभिर्देवयानैरोषधीषुप्रतितिष्ठा
शरीरैःस्वाहा।प्रजापतयइदं०।येषामीशेपशुपतिःपशूनांचतुष्पदामुतचद्विपदां।
निष्क्रीतोयंयज्ञियंभागमेतुरायस्पोषायजमानस्यसंतुस्वाहा।प्रजापतयइदं०।ये
बध्यमानमनुबध्यमानाअभ्यैक्षंतमनसाचक्षुषाच।अग्निस्तांअग्रेप्रमुमोक्तुदेवः
प्रजापतिःप्रजयासंविदानःस्वाहा।प्रजापतयइदं०।यआरण्याःपशवोविश्वरूपाविरू १५

पाःसंतोबहुधैकरूपाः।वायुस्तांअग्रेप्रमुमोक्तुदेवःप्रजापतिःप्रजयासंविदानःस्वा
हा।वायवइदं०।प्रमुंचमानाभुवनस्यरेतोगातुंधत्तयजमानायदेवाः।उपाकृतंशशमा
नंयदस्थाज्जीवंदेवानामप्येतुपाथःस्वाहा।विश्वेभ्योदेवेभ्यइदं०।यथासंभवंवाहोमः।
अग्नीध्रआह्वनीयसमीपेउल्मुकमसंस्पृष्टंनिधाययथेतंत्रिःपुनःप्रतिपर्येति।प्रति
प्रस्थाताअपाव्यहोमानंतरंउपवेषेणप्रुराणगार्हपत्यादुदीचींगारान्निरोहति।मातु
रिश्वनोघर्मोसीतितानाशयदक्षिणयाद्वारादक्षिणेनविहारंब्रह्मयजमानयूपानामंत
रतस्थानादरन्त्रोयंबहिर्गच्छत्यंतरेणचात्वालोत्करौउदग्गत्वाशामित्रदेशेनिदधाति।आ
ग्नीध्रःशामित्राद्यूपोत्तरवेद्योर्मध्येनोदङ्नीयपशोरग्रतउल्मुकंगृहीत्वागच्छति।अ

प॰प्र॰
२६

अध्वर्युर्यजमानश्च पशुं वपाश्रपणीभ्यामन्वारभेते। अध्वर्युराश्राव्य प्रत्याश्राविते आहोपप्रे
ष्य होतर्हव्या देवेभ्य इति। अंतरेण चात्वालोत्करावुदंचं नीयमानं पशुमनुमंत्रयते। नाना
प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह देवयानः। जीवं देवानामप्येतु पाथः सत्याः
संतु यजमानस्य कामाः। रेवतीर्यज्ञपतिं प्रियधा विशतोरो अंतरिक्ष सजूर्देवेन वातेना श्रौ॰४
स्य हविषस्त्मना यज समस्य तन्वा भव वर्षो वर्षीयसि यज्ञे यज्ञपतिं धा इति। आग्नी
ध्र उल्मुकं निःक्रम्य किंचिद्गत्वा शामित्रसकाशे उल्मुकं निदधाति। अध्वर्युस्तस्यो
ल्मुकस्योत्तरतः प्राग्वोपाकरणबर्हिषोरेकमुपास्यति। पृथिव्याः संपृचः पाहीत्या २६
मित्रीत्याह। अथ एवं तमाशुं संज्ञपयतेति। यजमानऋत्विजश्च संज्ञप्यमानपशुमनवे
त्ह

क्ष्यमाणाः पृषदाज्यसमीपे आसते इह प्रजा विश्वरूपा रमंतामस्मिन्यज्ञे विश्वविदो
घृताचीः। अग्निं कुलायमभिसंवसानाः अस्माँ अवंतु पयसा घृतेन। शमितारो बर्हि
षउपरि प्रतीचीनशिरसमुदक्पादं संज्ञपयंति संज्ञप्त इति ब्रूयुः। अध्वर्युरुपाकरण
प्रभृति संज्ञपनपर्यंतं वाशने वेपने पलायने मरणे शकृत्करणे मूत्रकरणे च प्रतिनिमि
त्तं निमित्तानुपूर्व्येण तिस्रस्तिस्र आज्याहुतीर्जुहुयात्। यदस्य पारे रजसः शुक्रं ज्यो
प तिरजायत तन्नः पर्षदति द्विषोऽग्ने वैश्वानर स्वाहा। अग्नये वैश्वानरायेदं॰। यस्माद्भीषा वा
शिष्ठास्ततो नो अभयं कृधि प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे स्वाहा। रुद्राय
मीढुष इदं॰। यदिदमकस्तस्मै नमस्तस्मै स्वाहा। रुद्राय मीढुष इदं॰। एवं निमित्तविशे

न

प०प्र०
२१

वानुगुप्तयेवेनोदः। द्वयोरुदकस्पर्शः। यस्माद्भीषापविपिष्ठाः० यस्माद्भीषापुजायिष्ठाः०
यस्माद्भीषासमज्ञास्थाः० यस्माद्भीषान्नाहृदकृथाः० यस्माद्भीषामूत्रमकृथाः० उ
पवेशने। यस्माद्भीषान्यषदः० मैत्रावरुणदंडेनोत्थापयेत्। उदुष्यगतिष्ठतीति तिष्ठमा
न्निषोमेमंयुवंयजमानंचरीरिषः। स्वर्गेलोकेयजमानंहिधेहि। शामित्रंणाधिष्ण्यप्रदेशाच
तुष्पदे। एतानिमिमित्तिकीराज्याहुतीजुहुत्वापूर्वाज्यास्रक्कंजुहोतीतेनसंज्ञप्ताहुतिंजुहोति।
यत्पशुर्मायुमकृतोरोवापद्भिराहते। अग्निर्मातस्मादेनसोविश्वान्मुंचत्वंहसः स्वा
हा। अन्नपदं० पशुमभ्यमौलीति। शमितारमुपेतेनयज्ञंदेवेभिरिन्वितं। पाशात्पशुंप्रमुं
चतबंधाद्यज्ञपतिंपरि। पाशात्प्रमुंचमानपशुमनुमंत्रयते। अदितिःपाशंप्रमुमोक्तु ²¹

तेनमः पशुभ्यः पशुपतयेकरोमि। अविशारववयावपाश्रयण्यापाशमादायनैर्ऋत्यांदि
शिनिरस्यति। अरातीयंतमधरंकृणोमियंद्विष्मस्तस्मिन्प्रतिमुंचामिपाशमिति। प्र
तिप्रस्थातापत्नीमुदकंलमंवुंडेमुत्थाप्य। नमस्तआतानेति अध्वर्युर्गमनकालेमं
तरेणचात्वालोत्करावुदङ्गुपनिःक्रम्यप्राचिमुदानयन्वाचयति। अनर्वाप्रेहि —
घृतस्याकुल्यामनुसहप्रजयासहरायस्पोषेणेति। अध्वर्युःपशोःसमीपेअपोवी
क्षमाणांपत्नींवाचयति। अपोदेवीःशुद्धायुवःशुद्धायूयंदेवाऊँढ्वंशुद्धावयंपरिवि २
ष्टाःपरिवेष्टारोवोभूयास्मेति। स्वयमेवगंतंडुवाणाजलंसिंचतीक्रमेणपशोःप्राणान्
प्याययति। वाचंते आप्यायतामितिवाचं। प्राणास्तआप्यायतामितिनासिके। चक्षु

स्तु आप्यायतामिति श्रवसुषी श्रोत्रे तं तु आप्यायतां श्रोत्रे। इत्यधिष्ठानमंत्रा इति केचि
त्। सकृदेव मंत्रं वदति पुनर्वागादित्येव संनमति। याते प्राणां छुरजगाम या चक्षुर्या श्रो
त्रं यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्त एतेन शुंधतामिति। नाभिस्तु आप्याय
तामिति नाभिं। पायुस्तु आप्यायतामिति गुदं। चतुरः पादानेकीकृत्य प्रक्षालयति
शुद्धाश्चरित्राः शमद्भ्यः शमोषधीभ्यः शं पृथिव्यै इति। अतिशिष्टा आपः दक्षिणं
श्रोणीमूलादारभ्यांतानि नयति। शमहोभ्यामिति। अध्वर्युः पत्नीं गमयित्वा पशोर्दक्षि
णपार्श्वे द्वितीयमुपाकरणबर्हिः प्रागग्रं निदधाति। ओषधे त्रायस्वैनमिति तस्यो
परि शामित्रः स्वधितिं तिर्यंचं निदधाति। स्वधिते मैनं हिंसीरिति। बर्हिषा स १८

हितं पंछित्वा बर्हिषोग्रं दक्षिणहस्तांगुल्यंतराले सक्तं कृत्वा बर्हिषोधोभागस्योभावंतौ सद
गृहीत्वा छिन्नप्रदेशं लोहितेनाक्तं नैर्ऋत्यां दिशि निरस्यति। रक्षसां भागोसीदमहं रक्षो
धमं तमो नयामि योस्मान्द्वेष्टि यं च वयं द्विष्म इदमेनमधमं तमो नयामि। अप उ०। पुन
र्विस्तीर्णं कृत्वा वपामुद्धरति। इषे त्वेति तया सशाखां वपाश्रपण्यां दधाति। घृतेन द्यावा
पृथिवी प्रोर्णुवाथां। अविशाखया वपाश्रपण्या वपाया अधोभागं गृहीत्वा वपां स्वधि
तिना छिनत्ति। अछिन्नो रायः सुवीरः। प्राङ्मुखः पर्यावृत्य वपामद्भिः प्रक्षाल्य शामित्रा
ग्नौ प्रतितपति। अथाग्नीध्रः पूर्वं निहितं उल्मुकमादायांतरेण चात्वालोत्करावुत्तरवेदिमभि
मुखं गच्छति तस्य पश्चादध्वर्युः उर्वंतरिक्षमन्विहीति। सदस्वपाया यजमानो वपाश्रपणी

प०प्र०
१९

मन्वारभते। आग्नीध्र उल्मुकमाहवनीये प्रक्षिपति। अध्वर्युराहवनीयस्योत्तरतस्तिष्ठन्नंतिमे
ष्वंगारेषु अंगुल्यंतरे स्थापयित्वा बर्हिषोग्रं प्रक्षिपति। वायो वीहि स्तोकानामिति। तस्य
बर्हिरग्रस्य ज्वालायां वपां किंचित्प्रतितप्य यूपाहवनीययोरंतरेणानीत्वा दक्षिणतः
प्रतिप्रस्थात्रे प्रयच्छति। प्रतिप्रस्थाता आहवनीयस्य दक्षिणत उदङ्मुखस्थित्वा
वपां श्रपयति। अध्वर्युरासीनः श्रप्यमाणाया वपाया उपरि अध्रुवाज्येन स्रुवाहुतिं
जुहोति। त्वामु ते दधिरे हव्यवाहं शृतं कर्तारमुत यज्ञियं च। अग्ने सदक्षः सतनु
र्हि भूत्वाथ हव्या जातवेदो जुषस्व स्वाहेति। अग्नये जातवेदस इदं०। अथाह स्तो १९
केभ्योनुब्रूहि। शृतायां वपायां अध्रुवाज्येन पात्रांतरे उपस्तीर्य वपामुद्धृत्यावधाया

ग्नावधिश्रित्य अपृषदाज्येनाभिघार्योद्वास्य तेनैवाज्येन सान्नायवदं करोति। यस्तं आ
त्मेति वपां दक्षिणतः स्रुचां पंचहो त्रासादयति। अग्निर्होता। अश्विनाध्वर्यू। त्वष्टाग्नीत्
मित्र उपवक्ता। यजमानेनासन्नाभिमंत्रणे कृते स्रुगादापने घृतवतीशब्दे जुहूपभृ
तावादाय अत्याक्रम्याश्राव्य प्रत्याश्राविते आह। स्वाहाकृतीभ्यः प्रेष्येति वषट्
कृते जुहोति। उदङ्ङत्याक्रम्या प्रयाजशेषेण ध्रुवामभिघार्य पृषदाज्यमभिघार्य द
क्षिणतो गत्वा वपामभिघार्य यथागतं प्रतिनिवृत्य चतुराज्यस्य गृह्णन् आह। अ
ग्नय आज्यस्यावदीयमानस्यानुब्रूहीति। अत्याक्रम्याश्राव्य प्रत्याश्राविते आह।
अग्नय आज्यं प्रस्थितं प्रेष्य याजमानं प्रकृति वदेत्। अथापृषदाज्येन जुहूमुपस्तीर्य

हिरण्यशकलमवधाय वपामेकीकृत्य स्रुवेणाददान आह इंद्राग्निभ्यां छागस्य वपा
या मेदसोऽवदीयमानस्यानुब्रूहीति वपां स्रुचि निधाय हिरण्यशकलमवधाय पूर्वाज्ये
नाभिघार्य पूर्वाज्यस्थालीं सस्रुवामाहवनीयस्य सकाशे निधायात्याक्रम्याश्राव्या
ह इंद्राग्निभ्यां छागस्य वपां मेदः प्रस्थितं प्रेष्येति पुरस्तात्स्रुवाहुतिं स्वाहा देवेभ्यः। देवे
भ्य इदं। हुत्वा होतुर्याज्यापाठकाले जातवेदो वपया गच्छ देवांस्त्वं हि होता प्र
थमो बभूथ। घृतेन त्वं तन्वं वर्धयस्व स्वाहाकृतं हविरदंतु देवाः स्वाहा इति पठन्
वषट्कारसमकालं वपां जुहोति। याजमानं प्रकृतिवत्। उपरिष्टात्स्रुवाहुतिं जुहोति।
देवेभ्यः स्वाहा। देवेभ्य इदं। विशाखां वपाश्रपणीमागश्राभविशाखां च प्रत्यगग्रां २०

सर्वे अपः स्पृष्ट्वा यथायतनमुपविशंति। अथाध्वर्युराग्नीध्रश्च पुरोडाशं निर्वपं(ति)प्रतिप्र
स्थातः पशुं विशाधि। अग्नीध्रः पात्रीं संमृज्य शालामुखीयस्य पुरस्तात् दर्भेषु पात्राणि
सादयति। स्फ्यमेकादशकपालानि शूर्पं कृष्णाजिनं शम्यामुलूखलमुसलं मेक्षणं पि
ष्टोद्वपनीं प्रणीताप्रणयनं दारुपात्रीं मदंतीमिति। अथोपवेशनादिनिर्वापादिषु इंद्रा
ग्निभ्यां। शालामुखीयस्य दाप्यलेपनिनयनांतं करोति। प्रतिप्रस्थाता उविच्छ्रदंते
आप्यनिनयनांते दासंप्रैषमाह। शमितः हृदयं जिह्वां वक्षस्तानि साधुं कुरुतात् तनिमम
तस्नौ तानि साधुं सव्यं दोरेकवरं कुरुतात् नानापार्श्वे अरधस्तात् दक्षिणं श्रोणिं भध्रु
ड्विं कुरुतात् दक्षिणं दोः सव्यां श्रोणिमणिमञ्जुदस्य तानि त्र्यंगानि कुरुतात् वनिष्ठुं वजाघ २१

कृत्वा रुवनीयेनुप्रहरति। स्वाहा धूर्नभसं मारुतं गच्छतम् इत्याह इति। ऊर्ध्वनभसे मारुता
येदं॥ वपाश्रपणीसंस्रावेणाभिजुहोति। उद्दूत्य कृष्णपथायतनं स्रुचौ सादयित्वा प्र
दक्षिणतो यजमानः पत्नी चात्वालदेशं गत्वा परस्परमाञ्जनं कुर्युः। पत्न्यो दिशो होत रोदिव
स्तत्रे दिशः प्रतिष्ठत्यात रोदिष्णुवाः स्थ रोदि अग्नीदो दीयजमान एदीति। सर्वे मार्जनं कुर्युः।
द्रुमापः प्रवहत तावद्यं च मलं च युयत। येभ्यो भिदुद्रोहानृतं च यच्च शेपे अभीरुणं। निर्मामु
चामि शापथ्यान्निर्मा वरुणादुत। निर्मा यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषादथो
मनुष्यकिल्बिषा दिति। यजमानोंजलिनापो गृह्णाति। सुमित्रा न आप ओषध
यः संतु। नैर्ऋत्यां दिशि सिंचति। दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं द्विष्मः॥

नीचावधस्तादुदुवः कुरुतात्त्रिः पशुं प्रच्यावयतात् अच्युतस्य पशोर्हृदयमुत्तमं कुरुतात्।
अथाध्वर्युः शामित्राग्नौ पशुकुंभीमधिश्रयति। द्यौरसीत्यादिना। तस्या मुदगग्रं शाखा
पवित्रं निदधाति। वसूनां पवित्रमसीत्यादि। तस्यां प्रभृतमुदकमानीय सर्वाण्यवदाना
नि निक्षिप्य श्रपयेत्। आग्नीध्रः स्थलेपशोर्दक्षिणेनाज्यस्थालीं दारुपात्र्यामित्याद्यं
तर्वै प्रासादयति। यजमानेनासन्नाभिमंत्रणे कृते अध्वर्युर्जुहूपभृतोरुपस्तीर्य पुरोडाश
मवद्यन्नाह। इन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रूहि। पूर्वार्धादवदायापरा
र्धादवद्यति। अभिघारयति। प्रत्यनक्ति। उपभृति स्विष्टकृते पुरोडाशस्योत्तरार्धात्स
कृत्सकृदवदाय द्विरभिघारयति न प्रत्यनक्ति। अत्याक्रम्याश्राव्य प्रत्याश्रावित आ

ऐंद्राग्निभ्यां पुरोडाशं प्रस्थितं प्रेष्येति वषट्कृते जुहोति। यजमानः। इंद्राग्निभ्यां० इंद्रा
ग्निभ्यो० इदमिंद्राग्निभ्यां। अध्वर्युः उपभृत्स्थितं पुरोडाशं जुह्वां समावपमानः आग्ना
येनुब्रूहि अनुवाक्यांते आश्राव्य। अग्नये प्रेष्येति ब्रूयात् वषट्कृते उत्तरपूर्वार्धे जुहो
ति। अग्नय इदं० अग्नेरहं देव० सुष्मान्यज्ञेन प्रतिष्ठां गमेयं। मार्जनांते हविरुच्छिष्ट
मुपास्य स्रुचि चतुर्गृहीतं गृहीत्वा अन्वाहार्यपचने उल्मुकवत्से इति कृत्वा इध्मप्रव्र
श्चनान्यभ्याधाय फलीकरणहोमं कृत्वा पूर्णपात्रनिनयनांतं समानं॥ ॥अथ सं
प्रैषमाह॥ ॥अग्नीदुत्तरं बर्हिरुपसादय प्रतिप्रस्थातः पत्नीं संवदस्वेति। आ
ग्नीध्रः स्रुचं दक्षिणबर्हिस्तीर्त्वा लक्ष्यूपाहवनीययोरंतरेणाहृत्य इडे स्तुतं प्रस्तरा २२

रवपामुपगृहेति प्रतिप्रस्थाता आज्यस्थालीं स्रुवं चादाय पूर्वं गृहीतात्पृषदाज्याज्जुह्वां
गृहीतांतरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य पृच्छति शृतं हवीः३ शमितरिति। शमिता
हृदयं शूलं धारयन् पुरतः शृतमिति ब्रूयात् प्रतिप्रस्थाता पुनरपि किंचिज्ज्ञात्वा पृच्छति शृ
तं हवीः३ शमितरिति शमिता तथैव ब्रूयात् एवं तृतीयं त्रिषु पर्यायेषु गमनमंत्राः पूषा मोप
सुपाः पातु पूषा माधिपाः पातु पूषा मा निधिपाः पातु इति तत्रैवागमनं। तत्र गत्वा शमि
तुर्हस्तात् शूलमादाय फलेन हृदयावदानं भित्त्वा शमितुर्हस्ते दत्त्वा पृषदाज्येन हृदयादीनभि
घारयति युगपत्। सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत्स्वाहेति।
पुनराज्यस्थाल्याः प्रत्येकं स्रुवेण सर्वाण्यवदानान्यभिघार्योद्धृत्य स्रुवास्य पुनरभिघार्य ए

कादशावदानानि प्रत्येकमवं करोति। यस्त्वं आत्मेति। विशूः कृत्वा दरतेति वदेव। अध्वर्युर्जु
हूपभृतौ ध्रुवाज्येनोपस्तृणाति। इडायामाज्यस्थाल्याज्येन वसाहोमहवन्याम पूर्वाज्येन
जुहूादिचतुष्टयं प्राशित्रं च स्वयं बर्हिर्गच्छन् यूपाहवनीययोरंतरेणाहृत्य दक्षिणतः सा
दयति। परिकर्मिणः पशुं पृथग्यूपं कृत्वा पाचांतरेण यूपं चाहवनीयं चांतरेणाहरंति। अ
ध्वर्युस्तं पंचहोत्रासादयति। यन्मे इति। स्रुचां दक्षिणतः प्लक्षशाखासमीप एवमेवाहृतं
यूपं दक्षिणतः सादयति यजमानोऽनुमंत्रयेत। अध्वर्युः प्लक्षशाखायां हृदयं निधाय स्वधि प्लक्षेन
तिनातस्याग्रेऽछिन्नपदेशाद्वधत्रात्। मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति। अथहृद
यं जुह्वां द्विरवद्यति। अथ जिह्वायावक्षसस्त्वनिम्नश्च वृक्कयोर्मेदसी पृथक् स्थापयित्वा दक्षि २३

णं वृक्या सव्य वृक्या सव्याद्दोष्णो दक्षिणस्याश्च श्रोण्या अर्धं दक्षिणश्रोण्या। अध्रुवा
उर्ध्वदेशान्तगुदं त्रेधा कृत्वा स्थूलमुपयड्भ्यो ऽग्रं स्विष्टकृते निधाय मध्यं द्वैधं कृत्वा जुह्वाम
वद्यति। पूर्वस्थापितदक्षिणवृक्यमेदो जुह्वां निधाय प्रसार्य तेन जुहूं प्रच्छाद्य जुह्वामुप
सिच्य ध्रुवाज्याद्यूपाहवनीययोर्मध्येनाहृतेन स्रुवेण जुहूमभिघारयति। सर्वाण्येववदा
नानि द्विर्द्विरवद्यति। सर्वत्रोपस्तरणाभिघारणे न प्रत्यंजनानि नसंति। उपभृति स्विष्ट
कृते सकृद्दक्षिणास्य दोष्णः सकृत्सव्यश्रोण्योर्मांसमवदाय गुदस्यार्धं निधाय सव्यवृ
क्यमेदो जुह्वां निधाय प्रसार्य तेनोपभृतं प्रच्छाद्य जुह्वामुपसिच्य पूर्ववद्द्विरभिघारय
ति। अवत्तावशिष्टेभ्यः प्राशित्रमवदाय पूर्ववदाज्यस्थाल्याः स्रुवदंडेनाभिघार्य निद

श्री

धाति। इडायां हृदयं जिह्वां वक्षः किंचिदवशेष्य च। तनिमं मतस्नेत्वनिष्टुमिति द्विर्द्विरवदाय
इडा नक्तस्तैरश्चान्यैरच्छिन्नैर्मेरिडां वर्धयित्वा पूर्णोपस्तिर्य पूर्वावदानेभ्य प्रत्यास्रुवेणाभि
घारयति। वसाहोमहवन्यां वसां गृहीत्वा पूर्णोपस्तीर्य पूर्वावदानेभ्यः स्रुवेणा
भिघारयति। अवदानान्यभिमृशति। ऐंद्रः प्राणो अंगे अंगे निदीध्यदैंद्रौ पानो अंगे अं
गे विवो भुवद्देवत्वष्टर्भूरि ते सं समेतु विषुरूपा यत्सलक्ष्माणो भवथ देवत्रा यंतमवसे
सखायोनु त्वा माता पितरो मदंतु इति। अथ दक्षिणस्य पार्श्वस्य मासवत्वदेशेन वसा
होमहवन्यां गृहीतां वसां मिश्रयति। आ रंस्व अग्निस्त्वा श्रीणातु आपः समरिणं त्वा तस्य
त्वा प्रस्मैन्यै पूर्णोरंहसो अपामोषधीनां रोहिष्ये। यथाहृतं जाघनीं प्रत्याहृत्य प २४

पदीमानस्या ३

श्वान्नीत्वा गार्हपत्यमुखीय समीपे निदधाति। पशुश्रुद्ध्यादि पंचकं यथाहृतं पर्याहृत्य यथास्था
नं निदधाति। अवशिष्टावदानानि यथाहृतमुत्तरतो नीत्वा सादयंति तथैवेडां वसां पात्रे च अ
ध्वर्युः पयागतं प्रत्येत्य जुहूपभृतावादाय न आरैंद्राग्निभ्यां छागस्य हविषोनुब्रूहि आ
त्याश्रावयत्याश्राविते ऐंद्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येति। प्रतिप्रस्था
ता वसाहवनीमादाय आहवनीयस्योत्तरतस्तिष्ठन् याज्यायां अर्धर्चे वसाहोमं जुहोति
वसा घृतं घृतपावानः पिबत वसां वसापावानः पिबतांतरिक्षस्य हविरसि स्वाहा त्वांतरिक्षाय स्वाहा।
अंतरिक्षायेदं०। अध्वर्युर्वषट्कृते जुहोति। इंद्रियावीतिशासनमार्गं प्रतिप्रस्थोपविश्य
वसाहोमशेषेण दिशो जुहोति। दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा। दिग्भ्यो नं

मोदिग्भ्यः स्वाहेति। दिग्भ्य इदं०। अध्वर्युः प्रदक्षिणमावृत्य जुह्वामुपस्तीर्य स्रुवेण पृषदा
ज्यात्सकृत्तं गृहीत्वा वनस्पतयेनुब्रूहि। द्विरभिघार्योपसव्यमावृत्याश्राव्य प्रत्याश्रावि
ते वनस्पतये प्रेष्य। वषट्कृते उत्तरार्धपूर्वार्धे अतिहाय पूर्वाहुतीर्जुहोति। यजमानः व
नस्पतय इदं०। वनस्पतेरहं देवयज्ययायुष्मान्यज्ञेनभू०यं। अध्वर्युः उपभृत्स्थं जुह्वां समा
नयमान आदाग्नये स्विष्टकृतेनुब्रूहीति। आश्राव्य प्रत्याश्राविते आदाग्नये स्विष्टकृते प्रेष्येति
वषट्कृते पूर्ववज्जुहोति। प्रक्षालननिनयनांते होतुर्दिशं गुल्मावनक्तीत्यादि। उपहूतायामि
डायां वनिष्ठुमग्नीधे षडवत्तं संपादयति। इडाभागमपीति केचित्। यजमानसप्तमा इडां
भक्षयंति मार्जयंते। ब्रह्मणे प्राशित्रं परिहरेत्यादि। ब्रह्मणः प्राशित्रमार्जनांते ब्रह्मणे २५

इदं० समुद्रायेदं०। बर्हिषोहं प्रजावान्भूयासं। अध्वर्युः प्रेष्य प्रेष्येतीतरान्यजेदूर्जो दिक्षु बर्हि
र्जेषु प्रस्तरस्त्वासद्यजेति वदेत्। प्रतिप्रस्थाता अंतरिक्षं गच्छ देवं सवितारं गच्छाहोरा
त्रे गच्छ मित्रावरुणौ गच्छ सोमं गच्छ यज्ञं गच्छ छंदांसि गच्छ द्यावापृथिवी गच्छ नभो दिव्यं
गच्छाग्निं वैश्वानरं गच्छेत्येतैः स्वाहाकारांतैर्द्वितीयादिषु वषट्कारसमकालं जुहोति। य
जमानः। देवीभ्यो द्वार्भ्य इदं०। अंतरिक्षायेदं०। द्वारामहं० प्रजा०सं। देवीभ्यामुषासानक्ता
भ्यामिदं०। देवाय सवित्र इदं०। उषासानक्तयोरहं० प्रजा०। देवीभ्यां जोष्ट्रीभ्यामिदं०। अहोरा
त्राभ्यामिदं०। जोष्ट्र्योरहं० प्रजावा०सं। देवीभ्यामूर्जाहुतीभ्यामिदं०। मित्रावरुणाभ्यामिदं०।
ऊर्जाहुत्योरहं० पशुमान्भूयासं। देवाभ्यां दैव्याभ्यां होतृभ्यामिदं०। सोमायेदं०। दैव्ययोर्दै २६

बर्हिः परिहर। इत्याग्नीध्र माहसतथाकरोति। यजमान अन्वाहार्यप्रतिग्रहानंतरं रु
त्विग्भ्योगांददाति। देवस्यत्वेत्यादिरुद्रायगामितिप्रतिग्रहमंत्रः। अथाध्वर्युसंप्रैषमा
हाग्नीदौपयजादंगारानाहरोपयष्टरुपसीदब्रह्मन्प्रस्थास्यामः संतिष्ठेति। आग्नीध्रः आ
मित्रानंगारानादायहोतुः पुरस्तादासादयति। प्रतिप्रस्थातागुदत्तृतीयभागंवसाहोमहव
नीचादायहोतुरुत्तरपार्श्वमुपविश्यगुदंप्रत्यनुयाजंस्वधितिना असंभिंदंस्त्रछिद्यवसाहो
महवन्यां अपर्यावर्त्यजुहोति। अध्वर्युः पूर्वंगृहीतंसमस्तंपृषदाज्यंविहृत्यजुह्वां समानीय
पृषदाज्यमग्रहणीमुपभृतंकृत्वात्याक्रम्याश्राव्यप्रत्याश्राविते ओंदेवेभ्यः प्रेष्येतिवषट्कृ
ते जुहोति। प्रतिप्रस्थातावषट्कारकालेजुहोति। समुद्रंगच्छस्वाहा। यजमानः बर्हिष

६

द्यौरिदं० पशु० देवायनराशंसायेदं०। छंदोभ्यइदं० नराशंसस्याहं० पशुमान्भूयासं। दे
वायवनस्पतयइदं०। द्यावापृथिवीभ्यामिदं०। वनस्पतेरहं०। युष्मान्यज्ञेनेष०। देवायबर्हि
षेवारितीभ्यइदं०। दिव्यायनभसइदं०। बर्हिषोवारितीनामहं०। प्रजा०। देवायाग्नयेस्विष्टकृत
इदं०। अग्नयेवैश्वानरायेदं०। अग्नेःस्विष्टकृतो०। युष्मान्यज्ञेनप्रतिष्ठांगमेयं। इतिप्रत्येकम
नुमंत्रणंकरोति। प्रतिप्रस्थाताबर्हिषिहस्तौनिमार्ष्टि। अद्भ्यस्त्वौषधीभ्योमनोमेहार्दि
यच्छ। यजमान औपयजिकंधूममन्वीक्षते। तन्तुंतन्वंपुत्रंनप्तारमशीयेति। अध्वर्युरुद्द्रु
त्याक्रम्यजुह्वां स्रुवमवधायोत्तरवेदेः पुरस्तात्स्थित्वा ऊर्ध्वस्तिष्ठंजुहोति। दिवंतेधूमोग
च्छत्वंतरिक्षमर्चिः पृथिवीं भस्मनापृणस्वस्वाहा। वायवइदं०। यथायतनं स्रुचौसादयि

त्वावाजवतीभ्यांस्रुग्व्यूहनेउपभृदनंतरंतन्मंत्रेणपृषदाज्यग्रहणीव्यूहेत् । सूक्तवाकेब्रह्मदि
ष्टानेप्रेष्येतिवदेत् । उक्तेतिवाचनेआज्यभागानंतरंइंद्राग्न्योर्वनस्पतेरित्यादि । प्रस्तरे
णसदर्भागरवापवित्रंप्रहरेत् । अग्नीदित्यादिसंस्रावहोमांतंकृत्वाउत्करेस्रुचौविमुंचेत् ।
अग्नेर्वापन्नगृहस्यसदसिसादयामिसुम्नायसुम्निन्यःसुम्नेधत्तधुरिधुर्यौपात । मा
प्रदक्षिणमावृत्यपत्न्युद्गृह्यहुत्वानालामुखीयेसोमंत्वष्टारंआज्येनेष्ट्वाजुह्वामुपस्ती
र्यजाघन्याअधोभागेहविरवदायाभिघार्यदेवानांपत्नीःपूर्ववद्यजतिपुनर्जुह्वामुपस्तीर्य
जाघन्याअधोभागेहविरवदायाभिघार्याग्निंगृहपतिंयजति । होतुर्हस्तउपस्तीर्यजा २१
घन्याअसोमपदेशाद्धविरवदायाभिघार्योपकृतायामिडायामग्नीधेजाघन्याअधोभा

दा

गादेवषडवत्तमाधायस्रुचिवत्सगृहीतंगृहीत्वान्वाहार्यपचतेपूर्ववत्प्रायश्चित्तंकृत्वा
पत्नीव्रतंविसृज्यप्राङेत्यध्रुवामाप्याय्यदर्शपूर्णमासोक्तप्रायश्चित्तानिकृत्वापंच
धान्तस्समज्यप्रहृत्यदक्षिणेनपदावेदिमाक्रम्यतिष्ठन्ध्रुवाज्यात्स्रुवेणोपहत्य
जुहोति । यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वाहा । यज्ञायेदं । पुनर्जुहोति । एषतेयज्ञोयज्ञप
तेसहसूक्तवाकःसुवीरःस्वाहा । यज्ञपतयइदं । स्रुवंनिधायध्रुवामादायजुहोति । दे
वागातुविदोइत्यादि । यजमानोविष्णुक्रमादिब्राह्मणतर्पणांतंकुर्यात् । अध्वर्युःस्फ्य
मुदपात्रंहृदयशूलमित्यादायएहियजमानेत्युक्त्वापत्न्यासहस्त्रिभिश्चांतरेणचात्वा
लोत्करावुदङ्मुपनिःक्रामति । अध्वर्युरग्रेणयूपंस्फ्येनोद्धत्यावोक्ष्यशुष्कार्द्रयोःसंधौहृ

प०प्र०
२८

दयस्थलमुपस्पृशति। सर्वमंत्रं कुर्वंत्युर्गसितमुभिर्यौवयोस्मां द्वेष्टि यं च वयं द्विष्म इति। स
मद्भिः प्रोक्षति। धाम्नोधाम्नो राजंनितो वरुणनोमुंच यदापो अघ्न्या इति त्रिवरुणेति चापामद्रेत
तोवरुणतोमुंचेति। यजमानोंजलिनापोगृह्णाति। सुमित्रा न आप ओषधयः संत्विति नैर्ऋ
त्यां दिशि सिंचति। दुर्मित्रास्तस्मै भूयासुर्योस्मां द्वेष्टि यं च वयं द्विष्म इति सर्वे पउपस्पृश्य हृदय
शूलमनवेक्षमाणा आगच्छंतोर्धपथे आर्द्राः सपलाशास्तिस्त्रस्तिस्त्रः समिध आददते।
एधोस्येधिषीम हीति प्रत्येकं। आहवनीये प्रदक्षिणक्रमेणा समिधोभ्यादधाति। समिदसि
स्वाहा। तेजोसि स्वाहा। तेजो मयि धेहि स्वाहा। आहवनीयमुपतिष्ठंते। अपो अन्वचारि
षं रसेन समसृक्ष्महि। पयस्वां अग्न आगमं तं मा सं सृज वर्चसा। औपयजिके २८

यौवेदेस्तीर्णं बर्हिरुपोषति। यत्कुसीदमप्रतीतं मयि येन यमस्य बलिना चरामि। इहै
व सन्निरवदयेतदेतत्तदग्ने अनृणो भवामि। त्रिः सक्तून्यवसक्तून्वा अपूर्वाज्येनो
पस्तीर्णाभिघारिता न्बर्हिषा पदीत्नेर्भो अंजलिना जुहोति। विश्वलोप विश्वदावस्य त्वा
संजुहोमि स्वाहा। अग्नय इदं०। हस्तौ मिथः संघृष्य लेपमनयति। अन्धादेकौ कुतादे
कैः स्तेनैः कृएवंत्वमेवज्रं सदः सखो वरेण्यं। पूर्ववद्द्वितीयं जुहोति। यान्यपामित्यान्यप्रती
तान्यस्मिं यमस्य बलिना चरामि इहैव संतः प्रतिदत्तयामो। जीवाजीवेभ्यो निर्हराम
एनत्स्वाहेति। जीवेभ्य इदं०। हस्तौ प्रमृज्यसयते अन्धादेक इत्यादि। पूर्ववत्तृतीयं जुहोति।
अनृणा अस्मिन्ननृणाः परस्मिं तृतीये लोके अनृणाः स्याम। ये देवयाना उत पित्र्या
समनुनादेक

याणाः सर्वान्पथो अनृणा आक्षीयेम स्वाहा। अग्नय इदं०। इत्यग्नौ ध्वंसयते। अग्न्याधादेशे इति।
वेद्यां तिष्ठन्नुत्तरवेद्यग्नीमुपतिष्ठते। अयन्नो नभसा पुरः सꣳस्फानो अभिरक्षतु। गृहा
णामसमर्त्यै बहवो नो गृहा असन्। अथ वायुमुपतिष्ठते। स त्वं नो नभसस्पत ऊर्जं नो धे
हि भद्रया। पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि। आदित्यमुपतिष्ठते। देव सꣳस्फान
सहस्रपोषस्येशिषे। स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिं। यू
पमुपतिष्ठते। आशासानः सुवीर्यꣳ रायस्पोषꣳ स्वश्वियं। बृहस्पतिना राया स्वगा
कृतो महां यजमानाय तिष्ठ। बर्हिरुपोषणादि एतद्दत्तयाजमानं वा। समारोपणपक्षे त्रे
धर्तुः पत्नीयजमानान्वारब्ध उत्तरवेद्यग्निं समिधि समारोपयेत्। अयं ते योनि०। रयिमि २७

ति। तां समिधं शालामुखीये आदधाति। आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां योनिमासी
द साध्या। अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत। उद्बुध्यस्वाग्ने प्र
ति जागृह्येनमिष्टापूर्ते सꣳसृजेथामयं च। पुनः कृण्वꣳस्त्वा पितरं युवानमन्वाताꣳसीत्त्व
यि तन्तुमेतं। शालामुखीयं ज्वलयित्वा पूर्णाज्येन चतुर्गृहीतेन स्रुवेनेति पूर्णाहुतिं जुहो
ति। मां वरं दद्यात्। संतिष्ठते पशुबंधः। यज्ञो बभूवेत्यादि तर्पणांतं कुर्यात्। समारोप
णपक्षे अग्नौ समारोप्य अग्निहोत्रस्थानं गत्वा मथित्वा विहृत्य मनस्वतीं कृत्वा काले
होमं कुर्यात्। एके आचार्याः पशुबंधेन्वाधानं व्रतोपायनं दृष्ट्यां प्रणीतां याजमानमा
ज्यभागौ प्राचित्रं यजमानब्रह्मभागौ चतुर्द्धाकरणं विष्णुक्रमणमित्येकादश नु स्युः

प॰ पु॰
३०

लि। पशुके वितते तंत्रे होमकाल उपस्थिते। अपरे तु विहारेस्यास्सर्वे वौत्तरवेदिके। सद्यस्का
ले पशोः पक्षे होमकाल उपस्थिते समाप्यैव तु होतव्यं काल एव तु होतितु॥ ॥निरूढपशुबं
धप्रयोगः॥ ॥समाप्तमस्तु। सद्योयइकालात्ययेपि पशुबंधः समाप्य सायमग्निहोमहो
मः। अनुद्धरणप्रायश्चित्तं न भवति। तं त्रेधा पशुर्नित्यः काम्यश्च तत्र नित्यः षट्सु षट्सु
मासिषु यावज्जीवं प्रयोज्यः। माघेमासे धनिष्ठानक्षत्रगते सवितरि एकस्य पशोः का
लः। आश्रेषा आषाढे तरार्धगते सवितर्यन्यस्य पशोः कालः। अयनयोरादौ वा। एवं प
शुद्वयं कर्तुमशक्तस्य प्रतिसंवत्सरमुदगयने पूर्वनक्षत्रे वा एक एव पशुः कर्तव्यः। पक्ष
द्वयेपि रेवत्यमावास्यायां यजनीये आरंभः। प्रतिवर्षमेकमपि कर्तुमशक्तो यस्मिन्क ३०

स्मिंश्चित्संवत्सरे यावज्जीवार्थमेकमपि कुर्यात्। सोपवसथः सद्यो वा। प्रावृषि पौर्णमा
स्याममावास्यायां वा इत्यापस्तंबः। संवत्सरे संवत्सरे प्रावृषि एक एव पशुः कर्तव्यः।
आवर्तनात्स्विवर्तुषु पर्वसु पशुः कर्तव्य इति कालः। ।इति पशुबंधः समाप्तोयं। ।
श्रीभवानीशंकरार्पणमस्तु। ।श्रीयज्ञेश्वरप्रसन्नोस्तु। ।श्रीरस्तु। ।शुभमस्तु।
श्री। ।छ। ।श्री। ।छ। ।श्री। ।छ। ।श्री। ।छ। ।श्री। ।छ। ।श्री। ।छ। ।श्री।